अध्याय :- ५६ chapter-56

नारद उवाच ।।[१]

अतः परं प्रवक्ष्यामि ब्रह्मेशं लिंगमुत्तमम् ।।
वस्य [२]स्मरणमात्रेण वाजपेयफलं भवेत् ।। १

एकदा तु पुरा पार्थ सृष्टि कामेन ब्रह्मणा ।।
तपः सुचरितं घोरं सार्धवर्ष सहस्त्रकम् ।। २

तपसा तेन सन्तुष्टः पार्वतीपति शंकरः ।।
वरमस्मै ततः प्रादाल्लोककर्त्रे स्ववांछितम् ।। ३

ततो हृष्टः प्रमुदितः कृतकृत्यः पितामहः ।।
ज्ञात्वा क्षेत्रस्य माहात्म्यं स्वयंलिंग चकारह ।। ४

चखान च सरः पुण्यं नाम्ना ब्रह्मसरः शुभम्[३] ।।
महीनगरकात्पूर्वे महापातक नाशनम् ।। ५

अस्य तीरे महालिंगं स्थापयामास वै विभुः ।।
तत्र देवः[४] स्वयं साक्षाद्विद्यते किल शंकरः ।। ६

पुष्करादधिकं तीर्थं ब्रह्मेशं नाम फाल्गुन ।।
तत्र स्नात्वा नरो भक्तया पिंडदानं समाचरेत् ।। ७

---

१ अ. श्री नारद ।। ब. श्री नारद उ० ।।
२ अ. ब. श्रवण
३ अ. शुभं
४ ब. देव

दानं चैव यथाशक्त्या कार्तिक्यां च विशेषतः ।।
देवं प्रपूजयेद्भक्तया ब्रह्मेशं त्द्रष्ट मानसः ।। ८

पितरस्तस्य तुष्यंति यावदाभूत संपल्वम् ।।
पुष्करेषु च यत्पुण्यं कुरुक्षेत्रे रविग्रहे ।। ९

गंगादि पुण्य तीर्थेषु यत्फलं प्राप्यते नरैः[१] ।।
तत्फलं समवाप्नोति तीर्थस्यास्यावगाहनात् ।। १०

मोक्षलिंगस्य माहात्म्यं श्रृणु पार्थ महाद्भुतम् ।।
मया स्थानहितार्थं च समाराध्य महेश्वरम् ।। ११

*[२] स्थापितं प्रवरं लिंगं नाम्ना मोक्षेश्वरं हरम् ।।
दर्भाग्रेण ततः पार्थ कूपं खनितवानहम् ।। १२

प्रसाद्य लोककर्तारं ब्राह्माणं परमेष्ठिनम् ।।
कमंडलो ब्रह्मणश्च समानीता सरस्वती ।। १३

कूपेऽस्मिन्मोक्षनाथस्य लोकानां प्रेतमुक्तये ।।
कार्तिकस्य तु मासस्य शुक्लपक्षे चतुर्दशी ।। १४

---

१ अ, ब, नरः

२ स्थापितं..... हरम् ।। बं प्रती इत्ययं पाठः नास्ति ।

कूपे स्नात्वा नरस्तस्यां तिलपिंडं समाचरेत् ।।
प्रेतानुद्दिश्य नियतं मोक्ष–तीर्थफलं भवेत् ।। १५

कुले न जायते तस्य प्रेतः[1] पार्थन संशयः ।।
प्रेतौ मोक्षं प्रगच्छन्ति तीर्थस्यास्य प्रभावतः ।। १६

जयादित्य–कूपवरे नरः स्नात्वा प्रयत्नतः ।।
गर्भेश्वरं[2] नमस्कृत्य न स गर्भेषु मज्जति ।। १७

इदं मया पार्थ तव प्रणीतं गुप्तस्य क्षेत्रस्य समासयोगात् ।।
माहात्म्यमेतत्सकलं श्रृणोति यः स्याद्विशुद्धः किमुवच्मि भूयः ।। १८

*३ इति श्री स्कांदे...... ब्रह्मेश्वर मोक्षेश्वर गर्भेश्वर माहात्म्यवर्णनं नाम षट्पंचाशत्तमोऽध्यायः ।।

---

१ ब. प्रेतौ
२ ब. गर्भेश्वरं अ. प्रतौ नास्ति ।
*३ अ. इति श्री स्कंद पुराणे कुमारिका खंडे ब्रह्मेश्वरादि माहात्म्यं ।।
ब. इति श्री स्कंद पुराणे कुमारिका खंडे ब्रह्मेश्वरादि माहात्म्ये अष्टपंचाशोऽध्यायः ।।५८।।
( Actually it is 56th Adhyāya.)